# AdyA kAlikAdevyAH shatanAmastotram

# આદ્યા કાલિકાદેવ્યાઃ શતનામસ્તોત્રમ્

## Document Information

Text title : AdyAkAlikAshatanAmastotram

File name : AdyAkAlikAshatanAmastotram.itx

Category : devii, stotra, dashamahAvidyA, devI

Location : doc_devii

Latest update : August 6, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# આદ્યા કાલિકાદેવ્યાઃ શતનામસ્તોત્રમ્

કાલિકાશતનામસ્તોત્રમ્
॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

શ્રીસદાશિવ ઉવાચ ॥

શ‌ૃણુ દેવિ જગદ્વન્દ્યે સ્તોત્રમેતદનુત્તમમ્ ।
પઠનાત્ શ્રવણાદ્યસ્ય સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૧॥

અસૌભાગ્યપ્રશમનં સુખસમ્પદ્વિવર્ધનમ્ ।
અકાલમૃત્યુહરણં સર્વાપદ્વિનિવારણમ્ ॥ ૨॥

શ્રીમદાદ્યાકાલિકાયાઃ સુખસાન્નિધ્યકારણમ્ ।
સ્તવસ્યાસ્ય પ્રસાદેન ત્રિપુરારિરહં શિવે ॥ ૩॥

સ્તોત્રસ્યાસ્ય ઋષિર્દેવિ સદાશિવ ઉદાહૃતઃ ।
છન્દોઽનુષ્ટુબ્દેવતાઽઽદ્યા કાલિકા પરિકીર્ત્તિતા ।
ધર્મકામાર્થમોક્ષેષુ વિનિયોગઃ પ્રકીર્ત્તિતઃ ॥ ૪॥

ૐ અસ્ય શ્રીઆદ્યાકાલિકાશતનામસ્તોત્રમન્ત્રસ્ય શ્રીસદાશિવઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રી આદ્યાકાલિકા દેવતા ।
ધર્મકામાર્થમોક્ષ સિધ્યર્થે જપે વિનિયોગઃ ॥

હ્રીઁ કાલી શ્રીઁ કરાલી ચ ક્રીઁ કલ્યાણી કલાવતી ।
કમલા કલિદર્પઘ્ની કપર્દીશકૃપાન્વિતા ॥ ૫॥

કાલિકા કાલમાતા ચ કાલાનલસમદ્યુતિઃ ।
કપર્દિની કરાલાસ્યા કરુણામૃતસાગરા ॥ ૬॥

કૃપામયી કૃપાધારા કૃપાપારા કૃપાગમા ।
કૃશાનુઃ કપિલા કૃષ્ણા કૃષ્ણાનન્દવિવર્દ્ધિની ॥ ૭॥

કાલરાત્રિઃ કામરૂપા કામપાશવિમોચની ।
કાદમ્બિની કલાધારા કલિકલ્મષનાશિની ॥ ૮॥

કુમારીપૂજનપ્રીતા કુમારીપૂજકાલયા ।
કુમારીભોજનાનન્દા કુમારીરૂપધારિણી ॥ ૯॥

કદમ્બવનસઞ્ચારા કદમ્બવનવાસિની ।
કદમ્બપુષ્પસન્તોષા કદમ્બપુષ્પમાલિની ॥ ૧૦॥

કિશોરી કલકણ્ઠા ચ કલનાદનિનાદિની ।
કાદમ્બરીપાનરતા તથા કાદમ્બરીપ્રિયા ॥ ૧૧॥

કપાલપાત્રનિરતા કઙ્કાલમાલ્યધારિણી ।
કમલાસનસન્તુષ્ટા કમલાસનવાસિની ॥ ૧૨॥

કમલાલયમધ્યસ્થા કમલામોદમોદિની ।
કલહંસગતિઃ ક્લૈબ્યનાશિની કામરૂપિણી ॥ ૧૩॥

કામરૂપકૃતાવાસા કામપીઠવિલાસિની ।
કમનીયા કલ્પલતા કમનીયવિભૂષણા ॥ ૧૪॥

કમનીયગુણારાધ્યા કોમલાઙ્ગી કૃશોદરી ।
કારણામૃતસન્તોષા કારણાનન્દસિદ્ધિદા ॥ ૧૫॥

કારણાનન્દજાપેષ્ટા કારણાર્ચનહર્ષિતા ।
કારણાર્ણવસમ્મગ્ના કારણવ્રતપાલિની ॥ ૧૬॥

કસ્તૂરીસૌરભામોદા કસ્તૂરિતિલકોજ્જ્વલા ।
કસ્તૂરીપૂજનરતા કસ્તૂરીપૂજકપ્રિયા ॥ ૧૭॥

કસ્તૂરીદાહજનની કસ્તૂરીમૃગતોષિણી ।
કસ્તૂરીભોજનપ્રીતા કર્પૂરામોદમોદિતા ॥ ૧૮॥

કર્પૂરમાલાભરણા કર્પૂરચન્દનોક્ષિતા ।
કર્પૂરકારણાહ્લાદા કર્પૂરામૃતપાયિની ॥ ૧૯॥

કર્પૂરસાગરસ્નાતા કર્પૂરસાગરાલયા ।
કૂર્ચબીજજપપ્રીતા કૂર્ચજાપપરાયણા ॥ ૨૦॥

કુલીના કૌલિકારાધ્યા કૌલિકપ્રિયકારિણી ।
કુલાચારા કૌતુકિની કુલમાર્ગપ્રદર્શિની ॥ ૨૧॥

કાશીશ્વરી કષ્ટહર્ત્રી કાશીશવરદાયિની ।
કાશીશ્વરકૃતામોદા કાશીશ્વરમનોરમા ॥ ૨૨॥

કલમઞ્જીરચરણા ક્વણત્કાઞ્ચીવિભૂષણા ।
કાઞ્ચનાદ્રિકૃતાગારા કાઞ્ચનાચલકૌમુદી ॥ ૨૩॥

કામબીજજપાનન્દા કામબીજસ્વરૂપિણી ।
કુમતિઘ્ની કુલીનાર્ત્તિનાશિની કુલકામિની ॥ ૨૪॥

ક્રીँ હ્રીँ શ્રીँ મન્ત્રવર્ણેન કાલકણ્ટકઘાતિની ।
ઇત્યાદ્યાકાલિકાદેવ્યાઃ શતનામ પ્રકીર્ત્તિતમ્ ॥ ૨૫॥

કકારકૂટઘટિતં કાલીરૂપસ્વરૂપકમ્ ।
પૂજાકાલે પઠેદ્યસ્તુ કાલિકાકૃતમાનસઃ ॥ ૨૬॥

મન્ત્રસિદ્ધિર્ભવેદાશુ તસ્ય કાલી પ્રસીદતિ ।
બુદ્ધિં વિદ્યાઞ્ચ લભતે ગુરોરાદેશમાત્રતઃ ॥ ૨૭॥

ધનવાન્ કીર્ત્તિમાન્ ભૂયાદ્દાનશીલો દયાન્વિતઃ ।
પુત્રપૌત્રસુખૈશ્વર્યૈર્મોદતે સાધકો ભુવિ ॥ ૨૮॥

ભૌમાવાસ્યાનિશાભાગે મપઞ્ચકસમન્વિતઃ ।
પૂજયિત્વા મહાકાલીમાદ્યાં ત્રિભુવનેશ્વરીમ્ ॥ ૨૯॥

પઠિત્વા શતનામાનિ સાક્ષાત્ કાલીમયો ભવેત્ ।
નાસાધ્યં વિદ્યતે તસ્ય ત્રિષુ લોકેષુ કિઞ્ચન ॥ ૩૦॥

વિદ્યાયાં વાક્પતિઃ સાક્ષાત્ ધને ધનપતિર્ભવેત્ ।
સમુદ્ર ઇવ ગામ્ભીર્યે બલે ચ પવનોપમઃ ॥ ૩૧॥

તિગ્માંશુરિવ દુષ્પ્રેક્ષ્યઃ શશિવત્ શુભદર્શનઃ ।
રૂપે મૂર્ત્તિધરઃ કામો યોષિતાં હૃદયઙ્ગમઃ ॥ ૩૨॥

સર્વત્ર જયમાપ્નોતિ સ્તવસ્યાસ્ય પ્રસાદતઃ ।
યં યં કામં પુરસ્કૃત્ય સ્તોત્રમેતદુદીરયેત્ ॥ ૩૩॥

તં તં કામમવાપ્નોતિ શ્રીમદાદ્યાપ્રસાદતઃ ।
રણે રાજકુલે દ્યૂતે વિવાદે પ્રાણસઙ્કટે ॥ ૩૪॥

દસ્યુગ્રસ્તે ગ્રામદાહે સિંહવ્યાઘ્રાવૃતે તથા ।

અરણ્યે પ્રાન્તરે દુર્ગે ગ્રહરાજભયેઽપિ વા ॥ ૩૫॥

જ્વરદાહે ચિરવ્યાધૌ મહારોગાદિસઙ્કુલે ।
બાલગ્રહાદિરોગે ચ તથા દુઃસ્વપ્નદર્શને ॥ ૩૬॥

દુસ્તરે સલિલે વાપિ પોતે વાતવિપદ્ગતે ।
વિચિન્ત્ય પરમાં માયામાદ્યાં કાલીં પરાત્પરામ્ ॥ ૩૭॥

યઃ પઠેચ્છતનામાનિ દૃઢભક્તિસમન્વિતઃ ।
સર્વાપદ્ભ્યો વિમુચ્યેત દેવિ સત્યં ન સંશયઃ ॥ ૩૮॥

ન પાપેભ્યો ભયં તસ્ય ન રોગેભ્યો ભયં ક્વચિત્ ।
સર્વત્ર વિજયસ્તસ્ય ન કુત્રાપિ પરાભવઃ ॥ ૩૯॥

તસ્ય દર્શનમાત્રેણ પલાયન્તે વિપદ્ગણાઃ ।
સ વક્તા સર્વશાસ્ત્રાણાં સ ભોક્તા સર્વસમ્પદામ્ ॥ ૪૦॥

સ કર્ત્તા જાતિધર્માણાં જ્ઞાતીનાં પ્રભુરેવ સઃ ।
વાણી તસ્ય વસેદ્વક્ત્રે કમલા નિશ્ચલા ગૃહે ॥ ૪૧॥

તન્નામ્ના માનવાઃ સર્વે પ્રણમન્તિ સસમ્ભ્રમાઃ ।
દૃષ્ટ્યા તસ્ય તૃણાયન્તે હ્યણિમાદ્યષ્ટસિદ્ધયઃ ॥ ૪૨॥

આદ્યાકાલીસ્વરૂપાખ્યં શતનામ પ્રકીર્તિતમ્ ।
અષ્ટોત્તરશતાવૃત્ત્યા પુરશ્ચર્યાઽસ્ય ગીયતે ॥ ૪૩॥

પુરસ્ક્રિયાન્વિતં સ્તોત્રં સર્વાભીષ્ટફલપ્રદમ્ ।
શતનામસ્તુતિમિમામાદ્યાકાલીસ્વરૂપિણીમ્ ॥ ૪૪॥

પઠેદ્વા પાઠયેદ્વાપિ શ‍ૃણુયાચ્છ્રાવયેદપિ ।
સર્વપાપવિનિર્મુક્તો બ્રહ્મસાયુજ્યમાપ્નુયાત્ ॥ ૪૫॥

Encoded by Dutta Prasad duttaprasadsharma at gmail.com
Proofread by Dutta Prasad, Gopal Upadhayay

*AdyA kAlikAdevyAH shatanAmastotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*